त्रैमासिकी / जून २०२६

# गीर्वाणपत्रिका

जयति जयति गीर्वाणी सरस्वती सुरसवती । सारस्वतजनमोहिनी संस्कृतसुविलासिनी ॥

## परिज्ञानलहरी विशेषाङ्कः-१




आनन्दाश्रमशिष्याग्र्यं स्वानन्दाम्बुधिमज्जितम् ।

जून २०२६

# अनुक्रमणिका


| | |
|---|---|
| **गुरूपदेशः** | १ |
| **निवेदनम्** | १ |
| **चिन्तनम्** | २ |
| **सुभाषितम्** | ३ |
| **पक्षिमित्राः भवाम ।** | ४ |
| **भूयो भूयो नमाम्यहम्** | ६ |
| **परिज्ञान-तरङ्गिणी** | ७ |
| असमर्थेषु सामर्थ्यस्य आविष्कारः | |
| **बालरञ्जनी** | ११ |
| श्रीपद्मपादाचार्यः | |
| शब्दपटः | १२ |
| **हास्यकणिका** | १० |
| **रुचिरा** | १३ |
| पूरणपोलिका | |
| **अरण्यरोदनं न्यायः** | १४ |
| **उत्तराणि** | १४ |

## ॥ गुरूपदेशः ॥



**दशमगुरु-परमपूज्य-**
**श्रीमत्-परिज्ञानाश्रम-स्वामिवर्यः ।**

गुरुः ज्येष्ठजनाः च तेषाम् आचारसंहितया साधनया च धर्मं संस्थापितवन्तः । ते शिक्षयन्ति यत् यदि तैः दर्शितः मार्गः अनुसृतः तर्हि जनाः संसारमायया भ्रमितः न भविष्यन्ति अपि तु जीवने उत्तरोत्तरं प्रगतिं करिष्यन्ति।



**एकादशगुरु-परमपूज्य-**
**श्रीमत्-सद्योजातशङ्कराश्रम-स्वामिवर्यः ।**

वयं यदा कस्मिन्नपि मङ्गलकार्ये प्रवर्तामहे, तदा जगद्गुरु-आदिशङ्कराचार्याणां मार्गदर्शनं निरन्तरम् अन्वेषयामः। गुरुः न केवलम् आत्मसाक्षात्कारस्य परमसत्यं प्रति अस्मान् नयति , किन्तु तदर्थम् अस्मान् सज्जीकर्तुं साहाय्यम् अपि करोति ।

गुरूपदेशानुवादः - अर्चना काप्राडक , चेन्नई

## निवेदनम्

ॐ श्रीगुरुभ्यो नमः । ॐ श्रीभवानीशङ्कराय नमः । ॐ श्रीमात्रे नमः ।

जूनमासस्य पञ्चदशदिनाङ्कात् आरभ्य आगामिषु पञ्चदशेषु मासेषु अस्माकं चित्रापुर-सारस्वत-समाजस्य कृते त्रयाणां परमपावनानां महोत्सवानाम् अलौकिकः समागमः समुपस्थितः। अयं कालः अस्माकं दशमगुरु-पूज्य-परिज्ञानाश्रम(तृतीय)-स्वामिनाम् अशीतितमजन्ममहोत्सवेन , तेषामेव षष्टितमपट्टाभिषेकवर्धन्त्या, तथा एकादशगुरु-पूज्य-सद्योजात-शङ्कराश्रम-स्वामिनां त्रिंशत्तमपट्टाभिषेकवर्धन्त्या च समलङ्कृतः भविष्यति । अस्माकं गुरुपरम्परायाः अयं तु एकः परममङ्गलमयः त्रिवेणीसङ्गमः एव। परमपूज्य-सद्योजात-शङ्कराश्रम-स्वामिनां कृपाप्रसादेन एषः १५ जून २०२६ दिनाङ्कात् आरभ्य १२ अक्टूबर २०२७ दिनाङ्कपर्यन्तं पञ्चदशमासान् व्याप्नुवन् पावनकालः **परिज्ञानलहरी** नाम्ना समग्रसारस्वतसमाजः सामूहिकरूपेण श्रद्धया आचरिष्यति ।

अयं महोत्सवः केवलं स्मृतिसमारोहः न अपितु सत्सङ्गेन सेवया साधनया च गुरुसम्बन्धं दृढीकर्तुं तथा आध्यात्मिकपथे अग्रे गन्तुम् एकः सुवर्णावसरः। विविधेषु आध्यात्मिक-सांस्कृतिक-कार्यक्रमेषु उपक्रमेषु च सहभागिनः सम्भूय धन्यतायाः अनुभूतिं कर्तुम् एकः उत्तमः अवकाशः।

परमपूज्य-परमगुरु-परिज्ञानाश्रम-गुरुवर्यैः जनहिताय बहुविधाः उपक्रमाः प्रवृत्ताः। एते उपक्रमाः गुरुसङ्कल्परूपेण परमपूज्य-सद्योजात-शङ्कराश्रम-गुरुवर्यैः सस्नेहं संवर्धिताः , सफलतया अग्रे नीताः , कार्यरूपेण परिणीताः च । एतदतिरिक्तं परमपूज्य-सद्योजात-शङ्कराश्रम-गुरुवर्यैःविविधेषु क्षेत्रेषु नैके नूतनाः उपक्रमाः अपि समारब्धाः।

परमगुरु-परिज्ञानाश्रम-तृतीय-गुरुवर्याणां जन्मदिनस्य शुभावसरे अस्मिन् अङ्के तेषाम् अनुग्रहेण एव संस्थापितस्य विरारस्थित-स्वामी-परिज्ञानाश्रम-विशेषशिक्षण-व्यावसायिक-प्रशिक्षणकेन्द्रस्य परिचयः प्रदीयते। गुरुवर्याणाम् असीमकरुणायाः तथा असामर्थ्येषु सामर्थ्यम् आविष्कृत्य तान् स्वावलम्बिनः कुर्वत्याः तेषां सर्वसमावेशकदृष्टेः इदम् एकं प्रत्यक्षप्रमाणम् ।

एषा परिज्ञानलहरी नवप्रेरणायाः स्रोतः भवतु , भक्तेः नूतनतरङ्गान् जनयतु तथा गुरुकृपायाः अक्षय्यप्रवाहे अस्मान् अधिकाधिकं निमज्जयतु इति सम्प्रार्थ्य श्रद्धया  विनम्रतया च वयम् एतमङ्कं परमगुरु-पूज्य-परिज्ञानाश्रम(तृतीय)स्वामिनां तथा पूज्य-सद्योजात-शङ्कराश्रम-स्वामिनां चरणकमलेषु सादरं समर्पयामः।

सम्पादिका

## चिन्तनम्

– **गौरी यन्नेमडी , मुम्बई**

- गुरुवर्याणाम् आशीर्वचनात् केचन अंशान् स्वीकृत्य  गीर्वाणप्रतिष्ठया आयोजिते एकस्मिन् चिन्तने गुरु-शिष्य-सम्बन्धस्य विषये नैकैः साधकैः स्वविचाराः प्रकटिताः। अस्य चिन्तनस्य सारांशः अधः दीयते ।

- गुरुः इति केवलम् एकः मानवशरीरधारी व्यक्तिः न किन्तु ‘ **धृतशिवमयगात्रं साधकानुग्रहार्थम् ।** ‘ शिष्यस्य उद्धारार्थं प्रकटितं चैतन्यरूपमेव ।

- यदा प्रथमवारं शिष्यः गुरोः सन्निधिम् आगच्छति तदा तस्य मनसः स्थितिः भयविस्मयमिश्रितं भूत्वा अपि दृढभक्त्याः कारणात् पदेपदे सः शिष्यः न केवलं गुरुशक्त्याः सान्निध्यात् ज्ञानं प्राप्नोति अपि तु क्रमशः शिष्यस्य जीवने उत्कर्षस्य पदार्पणम् अपि भवति ।

- शिक्षाप्रदानं कथं जायते?
यत्किमपि गुरुः शिष्यं प्रबोधयति, कर्तुं प्रचोदयति तत्तत् सर्वं गुरुवर्यैः प्रथमं स्वयम् आचरितम् अनुभूतं च। अतः ते शिष्यस्य प्रत्येकाम् अवस्थां ज्ञातुं शक्नुवन्ति। भिन्नभिन्नशिष्याणां कृते गुरुवर्याणाम् उपदेशः शिष्यस्य वैयक्तिकस्वभावानुसारं  तस्य साधनास्तरं तथा तस्य अधिकारम् अनुसृत्य एव भवति । अतः नैकवारं मृदुवचनैः अथवा कदाचित् किञ्चित् कठोरतया उपदेशः दीयते। कथमपि एषा प्रक्रिया भवतु किन्तु तस्यां शिष्यं

प्रति प्रीतिः तथा वात्सल्यमेव परिदृश्यते। मनुष्यजन्मनः अन्तिमलक्ष्यं मोक्षप्राप्तिः एतत् भूयो भूयः ते स्मारयन्ति येन साधनामार्गात् च्युतिः न भवेत् ।

- गुरुवर्याणां मार्गदर्शनं प्रत्यक्षं वा अप्रत्यक्षं भवितुं शक्यते। तेषां सान्निध्ये प्रत्यक्षं मार्गदर्शनं भवति। तेषाम् अनुपस्थित्याम् अनुस्मरणद्वारा , विवेकद्वारा अप्रत्यक्षं मार्गदर्शनं भवति । नैकदा आपत्त्याम् अनपेक्षितं साहाय्यं प्राप्नुमः तदा गुरुवर्याणाम् उपस्थितेः अनुभूतिः भवति । यद्यपि गुरुवर्याणां सान्निध्यं सर्वदा न साध्यं तथापि तेषां स्मरणेन, मन्त्रजपद्वारा , तेषाम् आशीर्वचन-भजनयोः श्रवणेन , करसेवायां सेवासप्ताहे उपस्थाय , धर्मग्रन्थानां पठनं कृत्वा , विमर्श-पूजन-भजनादिषु सहभागी भूत्वा तेषां सान्निध्यम् अनुभवितव्यम् । एवं यथा यथा अस्माकं श्रद्धाभक्ती च दृढे भवतः तथा तथा अप्रत्यक्षरीत्या गुरुवर्याणां मार्गदर्शनम् अपि प्राप्नुमः ।

- गुरुं प्रति कथं गमनीयम् ? गुरुं प्रति समिधापाणौ गमनीयम् । इत्युक्ते यत्किमपि शिष्यस्य समीपमस्ति , यथा कुल-विद्या-धन-साधनादिषु विषये यत् अहङ्कारः अस्ति , तत् सर्वं गुरुचरणयोः समर्पयितव्यम् । तथैव साधनासमये परिप्रश्नेन सेवया च मनसि उद्भूतानां शङ्कानां विनम्रतया प्रतिपादनं कर्तव्यम्। पूर्णशरणागतिः आवश्यकी ।

- **' पालनात् दुरितच्छेदात् कामितार्थप्रपूरणात्। '** दीक्षाप्रदानस्य समये एव गुरुवर्यैः शिष्यस्य उत्कर्षस्य उत्तरदायित्वं स्वीकृतम् । अस्माकं ज्ञातिः अल्पसङ्ख्यकाः भूत्वाऽपि सर्वेषु क्षेत्रेषु सदस्यैः उत्कर्षः प्राप्तः इति दृश्यते । एतस्य श्रेयः गुरुवर्याणाम् एव । ते एव एतस्य कारयितारः । अहोरात्रं साधनां कृत्वा ते सर्वेषाम् इहलौकिकीं तथा पारलौकिकीम् उन्नतिं साधयन्ति ।

## सुभाषितम्

**– वैशाली चव्हाण , मुम्बई**

**काकस्य गात्रं यदि काञ्चनस्य,**
**माणिक्यरत्नं यदि चञ्चुदेशे ।**
**एकैकपक्षे ग्रहणं मणीनां ,**
**तथापि काको न तु राजहंसः॥**

**भावार्थः –**

यदि काकस्य सर्वम् अङ्गं सुवर्णमयं क्रियते, चञ्चौ माणिक्यरत्नं स्थाप्यते, पक्षयोः बहुमूल्यानि रत्नानि स्थाप्यन्ते, तथापि काकः कदापि राजहंसः न भवति ।

केवलं नानाविधानि आभूषणानि धारयित्वा कस्यचित् मूलप्रकृतिः न परिवर्तते । कस्यापि यथार्थः स्वभावः तस्य चरित्रगुणैः प्रकटीभवति न तु बाह्यरूपेण ।

# पक्षिमित्राः भवाम ।

**– शिल्पा मुद्गर, मुम्बई**



अयि मित्राणि , किं भवन्तः कदाचित् कार्लाक्षेत्रं गताः? यदि न गताः तर्हि अवश्यं गच्छन्तु ।

लोणावळा-नाम्नः प्रसिद्धपर्यटनस्थलात् उपदश-किलोमीटर-दूरे स्थितः कार्लाग्रामः । मुम्बई-पुणे-राष्ट्रीयराजमार्गेण गमनसमये, कार्ला-पाटस्य समीपे, आकर्षकं श्वेतवर्णीयं भव्यमन्दिरं दृष्टिगोचरं भवति, ननु दर्शनार्थम् आह्वयति । मातुः आह्वानं श्रुत्वा मन्दिरं प्रति गम्यते चेत् श्रीदुर्गापरमेश्वरीदेव्याः सुन्दरमूर्तिः अन्तः आकर्षयति । देवीमातुः दिव्यदर्शनेन या धन्यता अनुभूयते सा अवर्णनीया । ततः श्रीगणेशं प्रणम्य श्रीमत्परिज्ञानाश्रम-तृतीयानां स्वामिनां जागृतसमाधिस्थलं प्राप्यते । गुरुसन्निधौ व्यतीताः केचन प्रशान्ताः क्षणाः महतीं शान्तिं यच्छन्ति । एतस्य स्थलस्य दर्शनं कष्टात् मुक्तिं मनःप्रसादञ्च यच्छति इति अनेकेषां शरणागतानाम् अनुभवः । यः मानवेषु, पशुषु, वनस्पतिषु, शिलासु – सर्वसजीवनिर्जीवेषु जड-चेतनेषु च एकं ब्रह्म अपश्यत्, तस्य आत्मज्ञानिनः महात्मनः महिमानं वर्णयितुं मम अर्हता नास्ति । तादृशीम् अनधिकार-चेष्टां न करोमि । अतः प्रत्यक्षानुभवार्थं भवद्भिः स्वयं कार्लाक्षेत्रम् आगन्तव्यम् इति विशेषाग्रहं करोमि ।

पर्वतानां तले स्थितस्य अस्य मन्दिरस्य निसर्गरम्य-परिसरः अपि अतीव आह्लादकरः । मादृश्याः पक्षिनिरीक्षण-उत्सुकायाः कृते ननु वरदानमेव । यदा यदा अत्र आगच्छामि मम श्रोत्रनेत्रं खगान्वेषणाय स्पृहयति । कदाचित् मया उपवने क्रीडन्तः कृष्णचूडाः (Red-vented Bulbul) दृष्टाः, कदाचित् समीपस्थेषु क्षेत्रेषु तेलपायिकानां (Spotted Munia), अङ्गारकाणां (Black Drongo) च छायाचित्राणि गृहीत्वा आनन्दः अनुभूतः । क्वचित् खञ्जन-पक्षिणः (Citrine Wagtail) चलत्पुच्छेन विनोदिता, क्वचित् रात्रौ तारं गायतां टिट्टिभानां (Red-wattled Lapwing) ‘ टि-टि-डू-इट् ’ स्वरेण मोदिता, क्वचित् दर्विदानां (Spoonbill) महत्समूहं वीक्ष्य विस्मिता चाभवम् ।



किन्तु अस्मिन् लेखे तेषां खगानां विषये न पठनीयम् । अस्य लेखस्य विषयः अस्ति अत्र दत्तं चित्रम् । चित्रे परमपूज्याः परिज्ञानाश्रम-तृतीय-स्वामिवर्याः सन्ति । तैः सह द्वौ श्वेत-कपोतौ दृश्येते । पशुपक्षिभिः सह स्वामिनां कश्चित् विशिष्ट-सम्बन्धः आसीत् । तेषां बहवः पालिताः पशवः आसन् । तैः शिराली-ग्रामे हरिणोद्यानं पक्षि-अभयारण्यं च निर्मिते । कार्ला-क्षेत्रे एकः कुक्कुरः, एकः बिडालश्च स्वामिनां निरन्तरसहचरौ आस्ताम् । तथैव द्वौ श्वेतकपोतौ (White Pigeons) द्वौ भारतीय-वितानपुच्छ-कपोतौ (Indian Fantail Pigeons) चापि आसन् । यद्यपि एतादृशान् दम्यकपोतान्

(tame pigeons) अहं कुत्रापि साक्षात् न दृष्टवती, चित्रमिदं वीक्ष्य तेषां विषये अधिकं ज्ञातुं मम कुतूहलम् अवर्धत । तथा अन्विष्य यद् मया ज्ञातं तदेव अहमत्र कथयामि ।

सर्वे दम्यकपोताः मूलरूपेण रोक डोव्ह (Rock Dove - Columba livia) जातितः उत्पन्नाः ।



वितानपुच्छ-कपोतः दम्यकपोतानां कश्चन प्रकारः । नैकेभ्यः वर्षेभ्यः चयनात्मक-प्रजननेन भारतदेशे एव विकसिता एषा प्रजातिः । एषः खगः श्वेतः, कपिशः, कृष्णः, मिश्रवर्णश्चापि भवति । व्यजनमिव विस्तारित-पुच्छं तस्य वैशिष्ट्यं येन फॅनटेल इति तस्य नाम यथार्थम् । तस्य पादौ अपि पिच्छाच्छादितौ । तेषाम् उड्डयनशक्तिः न्यूना भवति । प्रायः वितानपुच्छ-कपोताः तेषां सौन्दर्यार्थं पाल्यन्ते । यदा पुं-कपोतः वक्षः प्रस्फार्य, सुशिखं मस्तकम् उन्नीय, पिच्छकान् विस्तार्य इतस्ततः सञ्चरति राजा इव दृश्यते सः ।

न केवलं वितानपुच्छ-कपोताः अपि तु सामान्यपुच्छ-कपोताः अपि पाल्यन्ते । स्वभावेन सौम्याः शान्ताश्च कपोताः पालनीयेषु पक्षिषु उत्तमाः गण्यन्ते । तेषां शिरश्चालनयुक्तं चारुचलितं लक्षणीयम् ।

केचन कपोताः शोभार्थं पाल्यन्ते, अन्ये दूरगमनार्थं संवर्धिताः भवन्ति । आधुनिकसञ्चारतन्त्राणां पूर्वम् एते गृहप्रत्यागामिनः कपोताः (Homing Pigeons) सन्देशवहनकार्यार्थम् उपयुज्यन्ते स्म । तेषां स्वगृहं प्रति पुनरागमनसामर्थ्यम् अद्भुतम् । आनुवंशिकगुणैः, सम्यक् प्रशिक्षणेन, तथा च निजदिशाज्ञानकौशलेन तत् सम्भवति । एते खगाः सूर्यस्य स्थितेः, पृथिव्याः चुम्बकीयक्षेत्रस्य, तथा मार्गस्थानां विविधसङ्केतानां साहाय्येन मार्गमन्विष्यन्ति । आश्चर्यजनकं खलु !



कपोताः, ये पारावताः इत्यपि ज्ञायन्ते, समूहप्रियाः सामाजिकाश्च पक्षिणः । ते युगलरूपेण वसन्ति तथा दृढं दाम्पत्यबन्धं धारयन्ति । प्रजननकाले कपोती सामान्यतः अण्डद्वयं ददाति । शावकौ सार्धैक-मासं यावत् उड्डयनं कर्तुं न शक्नुतः अतः मातृपितृभ्यां सहैव निवसतः ।

यद्यपि कपोताः विविधवर्णीयाः भवन्ति, तेषु श्वेतकपोताः ईप्सिततमाः । श्वेतकपोतः शान्तेः पवित्रतायाः माङ्गल्यस्य प्रेम्णश्च प्रतीकमिति ज्ञायते । काचन लोकप्रसिद्धा कथा अस्ति यत् भगवान् शिवः अमरनाथगुहायां देवीपार्वत्यै अमरत्वस्य रहस्यम् अकथयत् । तदा एकं कपोतयुगलं तां कथां श्रुत्वा अमरत्वं प्राप्नोत् । भक्तानां विश्वासः अस्ति यत् तौ श्वेतकपोतौ अद्यापि गुहासमीपे दृश्येते, तथा तयोः दर्शनं शुभसूचकम् आशीर्वादरूपं च भवति ।

तयोः दर्शनं यद्यपि मया न लभ्यते तथापि पूज्यगुरुवर्यैः सह निवसतां कपोतानां चित्रं दृष्ट्वैव कृतार्थास्मि । ममापि भाग्ये गुरुसान्निध्यात् ईश्वरस्पर्शस्य क्षणं भवतु इति श्रद्धया प्रार्थये ।



# भूयो भूयो नमाम्यहम्

– वृन्दा चन्दावर , मुम्बई



शिवं तेजोमयं भक्तहार्दनिवासकम् ।
परब्रह्म-परिज्ञानगुरुं भूयो भूयो नमाम्यहम् ॥१॥

कैवल्यतुरीयस्थं निर्वाणदायकम् ।
परब्रह्म-परिज्ञानगुरुं भूयो भूयो नमाम्यहम् ॥२॥

प्रपन्नार्तिहरं सदा प्रसन्नचित्तम् ।
परब्रह्म-परिज्ञानगुरुं भूयो भूयो नमाम्यहम् ॥३॥

पञ्चमहाभूतानां सलीलं नियन्त्रकम् ।
परब्रह्म-परिज्ञानगुरुं भूयो भूयो नमाम्यहम् ॥४॥

नित्यप्रशान्तचित्तमभीष्टप्रदायकम् ।
परब्रह्म-परिज्ञानगुरुं भूयो भूयो नमाम्यहम् ॥५॥


भवार्णवोद्धारकम्  अपवर्गप्रदायकम् ।
परब्रह्म-परिज्ञानगुरुं भूयो भूयो नमाम्यहम् ॥६॥

# परिज्ञान-तरङ्गिणी

## असमर्थेषु सामर्थ्यस्य आविष्कारः

**– कृष्णानन्द मङ्कीकर , मुम्बई**

एक आसीत् कालः यस्मिन् अस्माकं भारतीयसमाजे शारीरिक वा मानसिक वा दृष्ट्या अबलान् बालकान् प्रति विशेषसंवेदनशीलता नासीत्। ते प्रायः 'विकलाङ्गाः' इति कठोराभिधानेन निर्दिश्यन्ते स्म । तेषाम् अधिकाराणां संरक्षणार्थं न आसन् विशेषनियमाः तथा तेषाम् उन्नत्यर्थं न आसन् विशेषसुविधाः ।



अस्माकं दशमगुरु-परमपूज्य-श्रीपरिज्ञानाश्रम-तृतीय-स्वामिनां प्रबला इच्छा आसीत् यत् ईदृशानां शारीरिकमानसिकदृष्ट्या अबलानां बालकानां साहाय्यं कृत्वा तेषां पुनर्वासः क्रियेत इति ।

यदा १९८१ वर्षम् "अन्तर्राष्ट्रीय-दिव्याङ्ग-वर्षम् " इति घोषितम् , तदा गुरुवर्याणाम् आदेशेन तथा अनुमोदनेन दिव्याङ्गजनानां कृते पाठशालास्थापनां लक्ष्यीकृत्य श्री-ट्रस्ट (Shree Trust) नाम संस्था स्थापिता । १९८५ तमे वर्षे गुरुवर्याणां सङ्कल्पः सिद्धः जातः। तेषां मार्गदर्शनेन विरारस्थितस्य डॉ. मोहन-मङ्कीकर-महोदयस्य नेतृत्वे प्रादेशिक-पुनर्वास-प्रशिक्षण-केन्द्रस्य साहाय्येन च स्वामी-परिज्ञानाश्रम-एज्युकेशनल्-ॲन्ड-वोकेशनल्-सेन्टर् नाम संस्था आरब्धा।

अस्मिन् समये एव यदा डॉ. मङ्कीकर-महोदयः सर्वकारेण पृष्टः यत् दिव्याङ्गबालकानां कृते एकां पाठशालां सञ्चालयितुं कोऽपि समर्थः अस्ति वा , तदा तेन तत्कालमेव शालास्थापनार्थं परमपूज्य-परिज्ञानाश्रम-गुरुवर्याणामनुमोदनं प्राप्तम् । अहो आश्चर्यम् ! केवलं पञ्चदशदिनेषु एव सर्वाः



शासकीय-व्यवस्थाः सम्पन्नाः कृत्वा, विरारग्रामे इयं शाला उद्घाटिता तथा च पञ्चदश बालकाः विद्यालयं समागत्य नूतनजीवनस्य प्रारम्भं कृतवन्तः। एषा न केवलं लौकिकी सिद्धिः, किन्तु अस्माकं परमपूज्य-स्वामी-परिज्ञानाश्रम-तृतीय-गुरुवर्याणाम् अनुग्रहप्रसादस्य प्रत्यक्षप्रमाणमेव आसीत् ।

एषा पाठशाला शारीरिक-मानसिकदृष्ट्या अबलानां बालानां न केवलम् आशास्थानमभवत् , किन्तु तेषामागामिनि काले आत्मनिर्भर-जीवितस्य एकं साधनमपि अभवत् । परमगुरुवर्याणां केवलं सङ्कल्पस्य प्रभावेन अयं विषयः कार्यान्वितः अभवत् ।

अस्याः पाठशालायाः वैशिष्ट्यम् यत् अत्र श्री-ट्रस्ट-संस्था सर्वेषां बालकानां गृहतः गमनागमनस्य, मध्याह्नभोजनस्य , शाला-गणवेशस्य तथा शिक्षायाः निःशुल्कमापूर्तिं करोति ।

अस्मिन् शालायां सर्वे विद्यार्थिनः केनापि न्यूनत्वेन ग्रस्ताः । केचन मूक-बधिराः, केचन




मन्दबुद्धियुक्ताः, इत्यादयः। किन्तु यत्संवर्धनं सङ्गोपनमत्र भवति तेन ते सर्वे, भविष्यकाले स्वीयमायुष्यं स्वसामर्थ्येन जीवितुं शक्ताः भवेयुः इति पाठशालायाः प्रशासनस्य स्तुत्यः प्रयत्नः।

परमपूज्य-परिज्ञानाश्रम-गुरुवर्यैः शालाकार्यकारिणी-समित्यै एकं दृष्टी-विधानं (Vision Statement) प्रदत्तम् "बालानाम् असामर्थ्ये सामर्थ्यं तथा अयोग्यतास्थाने योग्यतां पश्यामः" तथा च एकं लक्ष्यम् (Mission) अपि प्रस्तुतीकृतं " तेषां साहाय्यं कुर्वन्तु । तेषाम् आगामिनि आयुष्ये, मानसिकजीवनं सफलीकर्तुं दुर्दम्याम् आशां प्रज्वालयन्तु । " अहो ! कियत् समुचितमिदं तथा च कीदृशी दूरदृष्टिः गुरुवर्याणाम् ।

पश्यामः कथं बीजरूपेण संस्थापितः प्रयत्नः गुरुकृपया इदानीं फलीभूतो दृश्यते। अद्य तु तेनैव बीजेन विशालतरं वटवृक्षत्वं प्राप्तम् ।

विद्यालये अधुना त्रीणि भवनानि सन्ति तथा त्रिशताधिकाः छात्राः स्नेहेन, श्रद्धया च शिक्ष्यन्ते, स्वबलमवलम्ब्य जगत्सम्मुखं दृढतया गन्तुं समर्थाः






भवन्ति । एतेषां पदचिह्नानि राज्यस्तरं, राष्ट्रस्तरम्, अन्तरराष्ट्रीयमञ्चं च स्पृशन्ति , पुरस्कारमालाभिः अलङ्कृताः ते पुनः पुनरागच्छन्ति।

प्रतिवर्षं तेषां नृत्यरूपाणि विविधानि सांस्कृतिकप्रदर्शनानि च दर्शकानां चेतांसि हरन्ति। सुश्राव्येण पृष्ठभूमिसङ्गीतेन, सूक्ष्मेण नियोजनेन, कुशलनिर्देशनसमन्वितेन च एते कार्यक्रमाः एवं प्रस्तुताः यत् – यदि कश्चित् न विशेषतया सूचयेत् , तर्हि एते विशेषसामर्थ्ययुक्तबालकाः इति ज्ञातुमपि न शक्यते। अत्र विकलता अपि अविकलता इव भाति , असामान्यत्वं च वैशिष्ट्यरूपेणैव प्रकाशते। अहो भगवत्कृपा ! अहो गुरुकृपा ! अहो शिक्षकाणां निष्ठा , निदिध्यासनं , परिश्रमाश्च !

विविधनृत्यप्रकाराणां या विलक्षणा प्रस्तुतिर्विविधैः विद्यार्थिगणैः अस्माकं गुरुवर्याणां षष्ट्यब्दपूर्त्युत्सवप्रसङ्गे कृता , सा तु अस्माकं



स्मृतिपथेषु चिरकालं स्थास्यतीति निश्चितम् । कर्णबधिरैः मूकैः छात्रैः प्रस्तुतं नृत्यं तु अद्वितीयमेव। ते एकमपि स्वरं श्रोतुम् न शक्नुवन्तः किन्तु मनसि सङ्ख्यागणनां कृत्वा तैः कृतैः पदन्यासेषु हस्तविक्षेपेषु एकमपि हस्त-पदविक्षेपः न विषमीकृतः । एतेषां छात्राणाम् अतुलनीया प्रस्तुत्यः तु एकः विलक्षणः चमत्कार एव।

अस्यां शालायाम् अन्यमेकं हृदयङ्गमं दृश्यं द्रष्टुं शक्यते। केचन मातापितरः स्वबालकैः सह आगत्य प्रतिदिनं अध्ययनसमाप्तेः पर्यन्तं तत्रैव प्रतीक्षां कुर्वन्ति स्म। तेषां निष्क्रियः समयः अस्माकं परमपूज्येन गुरुणा सद्योजात-शङ्कराश्रम-स्वामिना सृजनशीलतायां परिणतः। " संवित्-सुधा- Holding Hands " इत्याख्ये उपक्रमे ते प्रशिक्षिताः – नानाविधानां स्यूतानां, पत्रिकाणां , पेटिकानां च निर्माणे। एवं श्रम एव साधनं, साधनं च स्वावलम्बनस्य मार्गः अभवत् । अद्य तु तेषां प्रतीक्षासमयोऽपि जीविकोपार्जनस्य साधनं जातम् ।

२०२५ वर्षस्य जनवरीमासात् आरभ्य अस्य विद्यालयस्य अष्टादशवर्षवयःप्राप्ताः छात्राः संवित्-सुधा-प्रणीते ' Holding Hands ' नाम्नि विभागे प्रशिक्षणार्थं नियुक्ताः भवन्ति। अत्र ते जीर्णपत्रेभ्यः निर्मितानि पानपात्रधारकाणि (coasters) , नूपुरान् , कङ्कणानि , कर्णाभरणानि , रक्षासूत्राणि , धूपवर्तिकाः





(agarbattis) इत्यादीनां वस्तूनां निर्माणे प्रत्यक्षानुभवं प्राप्नुवन्ति । तैः निर्मितानाम् उत्पादानां कृते निरूपित-वेतनं (stipend) दीयते यत् साक्षात् तेषां वित्तकोषलेखासु समाकलितं भवति ।

छात्राणां व्यावसायिककौशलस्य विकासः तथा तान् स्वावलम्बिनः आत्मनिर्भरान् च कृत्वा तेषां पुनर्वासनम् इत्यस्य प्रशिक्षणस्य अभिप्रायः।




२०२५ वर्षस्य जूनमासे परमपूज्यसद्योजातशङ्कराश्रमस्वामिनः दिव्यकरकमलैः षोडशसङ्गणकयुक्तः, प्रक्षेपक-पटलसमन्वितः तथा द्वाभ्यां वातानुकूलन-यन्त्राभ्यां सुसज्जितः नूतनः सम्पूर्णसुव्यवस्थितः सङ्गणकप्रयोगशालाविभागः उद्घाटितः।

विद्यार्थिभ्यः डिजिटल-परस्परसंवादात्मकीय-फलकानि (Digital Interactive Boards) अपि प्रदीयन्ते, येन अध्यापकानां कृते विषयस्य स्पष्टीकरणं बोधनं तथा विद्यार्थिनां कृते अवगमनम् अधिकं सुकरं भवति।

नूनम् , एतत्सर्वं गुरुकृपाया एव फलम्। यत् किञ्चिद् बीजं तदा रोपितं , तत् अद्य आदर्शसंस्थानरूपेण विकसितम् – यत् एतान् विशेषसामर्थ्ययुक्तबालकान् न केवलं शिक्षयति, अपि तु तान् स्वावलम्बिनः , स्वाभिमानिनः , स्वसामर्थ्येन जीवनभारं वोढुं समर्थान् च करोति।

गुरुकृपा एव या “सन्मार्गप्रदीपक” रूपेण अस्माकं सर्वेषां जीवनं प्रकाशयति अस्मिन् कः सन्देहः ?

इत्यलम् । शुभं भवतु ।







बालरञ्जनी

## श्रीपद्मपादाचार्यः

**– सन्ध्या त्रिकन्नाड, मुम्बई**

जगद्गुरूणाम् आदिशङ्कराचार्याणां चतुर्षु द्युतिमानेषु शिष्येषु पद्मपादाचार्यः तेषां प्रियतमः शिष्यः आसीत् । पद्मपादाचार्याय गुरुः एव परमश्रेष्ठः , तस्य गुरोः वचनानि चरमाणि च एव । बाल्यकालतः पद्मपादाचार्यः नरसिंहदेवस्य परमभक्तः। तीव्रतपोबलात् अनुष्ठानाच्च सः तस्य इष्टदेव-नरसिंहम् आत्मनि आविर्भावयितुं शक्तवान् । एकस्मिन् प्रसङ्गे तस्य एतत् सामर्थ्यं सिद्धं जातम् ।

एकदा कापालिकः नाम भैरव-अनुचरः गुरुवर्याणां समीपे आगत्य याचितवान् यत् मम देवाय मानव-शिरः अर्पितव्यमिति । तर्हि भवदीयं शिरः याचेऽहमिति । विना विलम्बेन परमौदार्यात् च गुरुवर्याः सम्मतिं दत्तवन्तः । " परन्तु यदा तत् कार्यं भविष्यति तदा कोऽपि शिष्यः भवतः समीपे उपस्थितः मा भवेत् । विशेषतया पद्मपदाचार्यः इति मम आग्रहः " इति सः कापालिकः उक्तवान् । तस्य तत् मनोरथम् अपि गुरुवर्याः स्वीकृतवन्तः । परन्तु कापालिकः न ज्ञातवान् यत् निध्यानेन पद्मपादः कापालिकस्य दुराशयं ज्ञातवान् इति ।




सायुज्य कल्याणपूर, मुम्बई

एकदा यदा शिष्याः नदीं स्नानाय गतवन्तः तदा एकस्य वृक्षस्य अधः गुरुवर्याः ध्याने मग्नाः उपविष्टाः आसन् तदा उचितावसरं गृहीत्वा कापालिकः हस्ते खड्गं धृत्वा गुरुवर्याणां प्रति धावितवान् । पद्मपादस्य विषये सः अनभिज्ञः आसीत् यत् वृक्षगुल्मानां पृष्ठे निलीय पद्मपादः पश्यन् आसीत् इति । कापालिकं दृष्ट्वा सन्दिग्धां परिस्थितिं ज्ञात्वा सः स्व-तपोबलात् इष्टदेवसदृशः अभवत् । कापालिकस्योपरि उत्प्लुत्य क्षणार्धात् तस्य शिरच्छेदं च कृतवान् । विजयीभूय सः उच्चैः गर्जनां कृतवान् । तीव्रगर्जनया शङ्कराचार्याः ध्यानात् जागृताः अभवन् । नद्याः तीरे स्थितः शिष्यगणः अपि तत्र शीघ्रमेव धावितवान्। अहो, सर्वेषां बहवः प्रयासाः आवश्यकाः आसन् पद्मपादाचार्यं पूर्वावस्थाम् आनेतुम् । बाल्यकालतः पद्मपादाचार्यः नरसिंहदेवस्य निष्ठावान् भक्तः आसीत् अतः कीयत् श्रेष्ठं तस्य सामर्थ्यम् इति सर्वे अवगतवन्तः ।

## बालरञ्जनी

### शब्दपटः

– सन्ध्या त्रिकन्नाड, मुम्बई




**वामतः दक्षिणम् -**

१) कः आसीत् जगद्गुरुः ?

२) पद्मपादः शङ्कराचार्याणां __ शिष्यः।

३) पद्मपादः __ पृष्ठे निलीतवान् ।

४) यज्ञकल्पाय कापालिकः किम् ऐच्छत्?

५) कापालिकः कः आसीत् ?

६) कापालिकः हस्ते किं धृतवान् ?

**उपरिष्टाद् अधः -**

७) कापालिकस्य __ पद्मपादः ज्ञातवान् ।

८) तपोबलात् कीदृशम् आसीत् पद्मपादस्य सामर्थ्यम्?

९) कापालिकस्य किम् अभवत्?

१०) कः आसीत् पद्मपादस्य इष्टदेवः ?

( उत्तराणि अन्तिम-पृष्ठे दत्तानि )

रुचिरा

# पूरणपोलिका

– पूर्णिमा कोड्कणी , कोल्हापूर







## साहित्यम्

### पूरणार्थम्

१) चणकदालः - चषकमितः

२) चूर्णितगुडः - पादोन चषकमितः

३) एलाचूर्णम् / एलालवङ्गचूर्णम् - अर्धचमसमितम्

४) जातिफलचूर्णम् ( जायफळ / Nutmeg ) - कणिकामात्रम्

५) घृतम् - बृहत्-चमसद्वयम्

### पोलिका-आवरणार्थम्

१) गोधूमचूर्णम् - चषकद्वयम्

२) जलम् - आवश्यकतानुसारम्

३) घृतम् - बृहत् चमसद्वयम्

४) लवणम् -कणिकामात्रम्



## कृतिः

### पूरणसिद्धिः

१) प्रथमं चणकदालं प्रक्षाल्य त्रिचषकजले मृदु भवति तावत् पचतु।

२) जलं निष्कास्य दालं मर्दयतु।

३) पात्रे घृतं तापयित्वा मर्दितं दालं गुडं च योजयतु।

४) मन्दाग्नौ मिश्रणं घनं भवति तावत् पचतु ।

५) एला-लवङ्ग-जातिफलचूर्णं च योजयित्वा सम्यक् मिश्रणं करोतु । आर्द्रवस्त्रेण आवृत्य अर्धघटिकापर्यन्तं शीतलीकर्तुं स्थापयतु।

### आवरणसिद्धिः

गोधूमचूर्णे आवश्यकतानुसारं लवणं घृतं च योजयित्वा मृदुपिण्डं करोतु।

### पोलिकासिद्धिः

१) पिण्डस्य लघुखण्डं गृहीत्वा हस्तेन चषकाकारं करोतु।

२) तन्मध्ये पूरणस्य गोलकं स्थापयित्वा सम्यक् पिधाय पुनः गोलाकारं कोशं करोतु।

३) शुष्कचूर्णसाहाय्येन मन्दं मन्दं वर्तुलाकार - पोलिकां प्रसारयतु ।

४) तप्तलोहपात्रे घृतेन उभयतः पोलिका रक्तवर्णा भवति तावत् पचतु ।

उष्णां रुचिकरां पूरणपोलिकां घृतेन सह परिवेषयतु ।

## अरण्यरोदनं न्यायः

– सुजाता हळदीपुर , मुम्बई

यदा कोऽपि बहुवारं साहाय्यम् अवलम्बनञ्च याचते किन्तु तस्य अपेक्षमाणस्य साहाय्यस्य सम्भावना एव न वर्तते तदा एषः न्यायः प्रयुज्यते ।

एतस्य न्यायस्य समर्थनार्थम् अस्ति एषा कथा । आगच्छन्तु , गच्छामः भवानीपुरम् ।

भवानीपुरम् एकः लघुग्रामः । अधिकतरजनाः कृष्युद्योगेन उपजीविकां चालयन्ति स्म । केचन अन्ये अन्येषु लघुव्यवसायेषु रताः। किन्तु सर्वे निरक्षराः।

केशवः तेषु एकः युवकः गोपालकः। सः ग्रामात् बहिः स्थितं विद्यालयं गत्वा शालेय-अभ्यासक्रमं पठितवान् । अतः तेन आरोग्यविषये किञ्चित् ज्ञातम् ।

ग्रामे स्थिते एकस्मिन् तडागे एव सर्वे ग्रामस्थाः सर्वाणि कार्याणि कुर्वन्ति स्म । तेन तस्य तडागस्य जलं मलिनं भवति स्म । तस्य एव दूषितजलस्य उपयोगः सर्वैः पानार्थमपि कृतः। अतः ते विविधैः रोगैः सर्वदा पीडिताः। स्वच्छता तु तत्र सदैव उपेक्षिता।

केशवः नैकवारं सर्वेभ्यः जनेभ्यः उपदिष्टवान्। व्यवहारे परिवर्तनं कर्तुं कोऽपि न उत्सुकः। किन्तु तत्तु अरण्यरोदनमिव!

केनापि तस्य सूचना न आचर्यते। अन्ततो गत्वा केशवः समीपे स्थितं मण्डलाधिकारिणं ग्रामस्य स्थितिं वर्णितवान् । भवानीपुरे शुद्धजलपूरणार्थे एकं कासारं तथा जनान् आरोग्यविषये बोधयितुं एकां पाठशालां निर्मातुं प्रार्थितवान् ।

तस्य प्रयासेन नूतनतडागस्य तथा प्राथमिकपाठशालायाः अपि प्रबन्धः साकारीभूतः।

### उत्तराणि

**शब्दपटः**

**वामतः दक्षिणम् –** १) आदिशङ्कराचार्याः २) प्रियतमः ३) वृक्षगुल्मानाम् ४) मानवशिरः ५) भैरव-अनुचरः ६) खड्गम्
**उपरिष्टाद् अधः –** ७) दुराशयम् ८) श्रेष्ठम् ९) शिरच्छेदम् १०) नरसिंहदेवः

**सम्पादिका –** वरदा सौकूर
**पृष्ठरचना –** वन्दना बळवळ्ळी
**सम्पादकीयसमितिः –** शीला कळावर , दुर्गा कुम्टा , अर्चना काप्राडक , सुधा कार्नाड , शिल्पा मुदूर
**सम्पादकीयसाहाय्यम् –** तेजश्री बैलूर

**अभिप्रायं तथा लेखं प्रेषयितुम् इच्छुकानाङ्कृते सम्पर्कः -**
**Email id: girvanapatrika@chitrapurmath.net.in** (लेखार्थं शब्दमर्यादा-२५०)

**गीर्वाणप्रतिष्ठायाः संस्कृताध्ययनार्थं संस्कृत-सम्भाषणार्थं च जालाधारित-वर्गाः प्रचलन्ति ।**
**पञ्जीकरणाय आवेदन-पत्रस्य सम्पर्क-सूत्रम्**
**https://chitrapurmath.net/site/activities-girvanaprathistha-online-classes**

Scan QR Code
for Enquiry Form